# श्रीसाईनाथमहिम्नस्तोत्रम्

सदा सत्स्वरूपं चिदानंदकंदं, जगत्संभवस्थानसंहारहेतुम् ।
स्वभक्तेच्छयामानुषं दर्शयंतं,
नमामीश्वरं सद्गुरुसाईनाथम् ॥ १ ॥

भवध्वांतविध्वंसमार्तंडमीड्यं,
मनोवागतीतं मुनीर्ध्यानगम्यम् ।
जगद्व्यापकं निर्मलं निर्गुणं त्वां, नमामी० ॥ २ ॥

भवांभोधिमग्नार्दितानां जनानां,
स्वपादाश्रितानां स्वभक्तिप्रियाणाम् ।
समुद्धारणार्थं कलौ संभवंतं, ॥ ३ ॥

सदा निंबवृक्षस्य
मूलाधिवासात्सुधास्राविणं तिक्तमप्यप्रियं तम् ।
तरूं कल्पवृक्षाधिकं साधयंतं, नमामी० ॥ ४ ॥

सदा कल्पवृक्षस्य तस्याधिमूले
भवद्भावबुद्ध्या सपर्यादिसेवाम् ।
नृणां कुर्वतां भुक्तिमुक्तिप्रदं तं, नमामी० ॥ ५ ॥

अनेकाश्रुतातर्क्यलीला विलासै:
समाविष्कृतेशानभास्वत्प्रभावम् ।
अहंभावहीनं प्रसन्नात्मभावं, नमामी ० ॥ ६ ॥

सतां विश्रमाराममेवाभिरामं सदा
सज्जनै: संस्तुतं सन्नमद्भि: ।
जनामोददं भक्तभद्रप्रदं तं, नमामी० ॥ ७ ॥

अजन्माद्यमेकं परं ब्रम्ह
साक्षात्स्वयंसंभवं–राममेवावतीर्णम् ।
भवद्दर्शनात्संपुनीत: प्रभोऽहं, नमामी० ॥ ८ ॥

श्रीसाईशकृपानिधेऽखिलनृणां सर्वार्थसिद्धिप्रद ।
युष्मत्पादरज: प्रभावमतुलं धातापि वक्ताऽक्षम: ।
सद्भक्त्या शरणं कृतांजलिपुट: संप्रापितोऽस्मि प्रभो,
श्रीमत्साईपरेशपादकमलान्नान्यच्छरण्यं मम ॥ ९ ॥

साईरूपधरराघवोत्तमं,
भक्तकामविबुधद्रुमं प्रभुम् ।
माययोपहतचित्तशुद्धये, चिंतयाम्यहमहर्निशं मुदा ॥ १० ॥

शरत्सुधांशुप्रतिमप्रकाश,
कृपातपात्रं तव साईनाथ । त्वदीयपादाब्जसमाश्रितानां
स्वच्छाययया तापमपाकरोतु ॥ ११ ॥

उपासनादैवतसाइनाथ, स्तवैर्मयो पासनिना स्तुतस्त्वम् ।
रमेन्मनो मे तव पादयुग्मे,
भृङ्गो, यथाब्जे मकरंदलुब्ध: ॥ १२ ॥

अनेकजन्मार्जितपापसंक्षयो,
भवेद्भवत्पादसरोजदर्शनात् । क्षमस्व सर्वानपराध–
पुंजकान्प्रसीद साईश गुरो दयानिधे ॥ १३ ॥

श्री साईनाथचरणामृतपूतचित्तास्तत्पादसेवनरता:
सततं च भक्त्या । संसारजन्यदुरितौधविनिर्गतास्ते
कैवल्यधाम परमं समवाप्नुवन्ति ॥ १४ ॥

स्तोत्रमेतत्पठेद्भक्त्या यो नरस्तन्मना: सदा ।
सद्गुरो: साइनाथस्य कृपापात्रं भवेद् ध्रुवम् ॥ १५ ॥